
**एकदशः पाठः**

# गङ्गा नदी



गङ्गा भारतवर्षस्य पवित्रतमा नदी वर्तते। इयं हिमालयस्य गोमुखस्थानात् प्रभवति। बंगोपसागरे गङ्गासागरनामके स्थाने इयं सागरजलेन मिलति।

गङ्गातटे बहूनि नगराणि सन्ति। अस्माकं बिहारस्य राजधानी पाटलिपुत्रमपि गङ्गायाःतटे स्थितम् अस्ति। गङ्गाजलम् अतिपवित्रं भवति। अस्याः जलेन धार्मिकं कार्यम् भवति । हिन्दूधर्मावलम्बिनां सर्वेषु शुभकार्येषु गङ्गाजलस्य आवश्यकता भवति।

गङ्गायाम् अनेकाः नद्यः मिलन्ति। तासु यमुना–सरयू–गंडकी–कौशिकी प्रभृतयः सन्ति। गङ्गायाः तटे हरिद्वार–प्रयाग–काशी–प्रभृतीनि प्रसिद्धतीर्थस्थानानि सन्ति। गङ्गाजलेन कृषिभूमेः सेचनं भवति।

अधुना जनाः गङ्गाजलं प्रदूषितं कुर्वन्ति। गङ्गातटे स्थितानां नगराणां सर्वाणि मलजलानि गङ्गायां पातयन्ति। केचन मनुष्याणां पशूनाञ्च मृतशरीराणि नद्यां प्रवाहयन्ति। इदं न साधु कार्यम् अस्ति। नदीजले मलानां क्षेपणं वैज्ञानिकविचारेण धार्मिकविचारेण च न शोभनम्।

## शब्दार्थः

| | | |
|---|---|---|
| भारतवर्षस्य | = | भारतवर्ष के |
| पवित्रतमा | = | सबसे पवित्र |
| वर्तते | = | है |
| हिमालयस्य | = | हिमालय के |
| गोमुखस्थानात् | = | गोमुख स्थान से |
| प्रभवति | = | निकलती है/निकलता है |
| बंगोपसागरे | = | बंगाल की खाड़ी में |
| गङ्गासागरनामके | = | गंगासागर नामक (में) |
| स्थाने | = | स्थान में |
| गङ्गातटे | = | गंगा के किनारे |
| बहूनि | = | बहुत |
| नगराणि | = | नगर (बहुवचन) |
| सन्ति | = | हैं |
| बिहारस्य | = | बिहार की |
| पाटलिपुत्रम् | = | पटना |
| गङ्गायाः | = | गंगा के |
| तटे | = | तीर पर |
| स्थितम् | = | बसा हुआ |
| अस्ति | = | है |
| अति | = | बहुत |
| पवित्रम् | = | पवित्र/स्वच्छ |
| भवति | = | होता है |
| अस्याः | = | इसकी |
| जलम् | = | पानी |
| शास्त्रानुसारेण | = | शास्त्र के अनुसार |
| तु | = | तो |
| धर्मावलम्बिनाम् | = | धर्म को मानने वाले |

| | | |
|---|---|---|
| **सर्वेषु** | = | सभी में |
| **तासु** | = | उनमें |
| **कौशिकी** | = | कोशी |
| **प्रभृतीनि** | = | इत्यादि |
| **सेचनम्** | = | सिंचाई |
| **पातयन्ति** | = | गिराते हैं |
| **केचन** | = | कुछ |
| **प्रवाहयन्ति** | = | प्रवाहित करते हैं |
| **साधु** | = | अच्छी तरह |
| **क्षेपणम्** | = | फेंकना |

## व्याकरणम्

पवित्रतमा (स्त्री0), पवित्रतमः (पु0), प्रभवति = प्र + $\sqrt{\text{भू}}$ + लट्लकार

**व्याख्या :** 'भू' धातु के लट्लकार में 'भवति' रूप होता है जिसका अर्थ है = होता है। परंतु 'प्र' उपसर्ग लगने पर 'प्रभवति' शब्द का निर्माण होता है जिसका अर्थ है उत्पन्न होना। इसी प्रकार उपसर्ग लगने पर धातु का अर्थ बदल जाता है।

बंग + उपसागरे = बंगोपसागरे । गंगाजलस्य + आवश्यकता = गंगाजलस्यावश्यकता ।

$\sqrt{\text{मिल्}}$ + लट्लकार = मिलति। $\sqrt{\text{अस्}}$ + लट्लकार = अस्ति। $\sqrt{\text{अस्}}$ + लट्लकार बहुवचन = सन्ति।

$\sqrt{\text{कृ}}$ + लट्लकार, बहुवचन = कुर्वन्ति।

**प्रेरणार्थक क्रिया का प्रयोग :–**

| | | |
|---|---|---|
| पतति (गिरता है) | – पातयति (गिराता है) | – पातयन्ति (गिराते हैं) |
| पठति (पढ़ता है) | – पाठयति (पढ़ाता है) | – पाठयन्ति (पढ़ाते हैं) |
| लिखति (लिखता है) | – लेखयति (लिखवाता है) | – लेखयन्ति (लिखवाते हैं) |
| चलति (चलता है) | – चालयति(चलाता है) | – चालयन्ति (चलाते हैं) |

**वाक्य-प्रयोग :–**

| | | |
|---|---|---|
| पत्ता गिरता है | = | पत्रं पतति। |
| बालक जल गिराता है | = | बालकः जलं पातयति। |
| छात्र पढ़ता है | = | छात्रः पठति। |
| शिक्षक पढ़ाते हैं | = | शिक्षकः पाठयति। |
| वह लिखता है | = | सः लिखति। |
| सीता पत्र लिखवाती है | = | सीता पत्रं लेखयति। |
| हाथी चलता है | = | गजः चलति। |
| वह साइकिल चलाता है | = | सः द्विचक्रिकां चालयति। |

## अभ्यासः

### मौखिकः

1. **निम्नलिखित शब्दों का शुद्ध उच्चारण करें-**

| | | | |
|---|---|---|---|
| (क) | गङ्गायाः | गङ्गायाम् | गङ्गया |
| | लतायाः | लतायाम् | लतया |
| | सीतायाः | सीतायाम् | सीतया |
| | अयोध्यायाः | अयोध्यायाम् | अयोध्यया |
| | गीतायाः | गीतायाम् | गीतया |

| | | | |
|---|---|---|---|
| (ख) | जलम् | जलेन | जलात् |
| | फलम् | फलेन | फलात् |
| | दुग्धम् | दुग्धेन | दुग्धात् |
| | ग्रामम् | ग्रामेण | ग्रामात् |
| | विद्यालयम् | विद्यालयेन | विद्यालयात् |

## लिखितः

**2. कोष्ठ में दिए गए शब्दों से तृतीया विभक्ति का रूप देकर रिक्त स्थानों को भरें:-**

**जैसे- सीता रामेण सह वनम् अगच्छत् (राम)**

| | | |
|---|---|---|
| (क) | मोहनः .................. सह विद्यालयं गच्छति। | (सोहन) |
| (ख) | लता .................. सह वाटिकां गच्छति। | (सीता) |
| (ग) | सीता .............. सह पुस्तकं पठति। | (गीता) |
| (घ) | रमेशः .............. लिखति। | (कलम) |
| (ङ) | मुकेशः .............. सह खादति। | (मित्र) |

**3. सुमेलित करें :-**

| | | | |
|---|---|---|---|
| (i) | कृषकः | (क) | प्रवहति |
| (ii) | छात्रः | (ख) | उपचारं करोति। |
| (iii) | चिकित्सकः | (ग) | कृषिकार्यं करोति। |
| (iv) | गङ्गा | (घ) | भवनम्। |
| (v) | विद्यालयस्य | (ङ) | पठति। |

**4. मंजूषा में से सही शब्द चुनकर रिक्त स्थानों को भरें :-**

**सन्ति, बहूनि, पवित्रतमा, पातयन्ति, गङ्गाजलम्, प्रभवति, गङ्गाजलेन**

(क) गङ्गा हिमालयात् ...................... ।

(ख) नदीषु गङ्गा ................. अस्ति।

(ग) गङ्गातटे .................. नगराणि ....................।

(घ) ............... जनाः पिबन्ति ।

(ङ) .................. कृषि-भूमेः सेचनं भवति।

(च) जनाः मलजलानि गङ्गायां ..................... ।

5. निम्नलिखित शब्दों का वर्ण-विच्छेद करें:-

जैसे- रामः = र् + आ + म् + अः

गङ्गा =

हिमालयः =

गोमुखम् =

नगरम् =

भवति =

6. निम्नलिखित विषयों पर संस्कृत में दो-दो वाक्य लिखें :-

हिमालयः, विद्यालयः, दीपावली ।

7. उत्तराणि लिखत :-

(क) भारतस्य पवित्रतमा नदी का ?

(ख) गङ्गा कुतः प्रभवति ?

(ग) अस्याः जलं कीदृशं भवति?

(घ) शुभकार्येषु कस्याः जलस्य आवश्यकता भवति ?

(ङ) अधुना जनाः गङ्गाजलं किं कुर्वन्ति ?

✦✦✦